Gyanshauryam, International Scientific Refereed Research Journal
© 2021 GISRRJ | Volume 4 | Issue 2 | ISSN : 2582-0095

# काव्यस्याऽऽत्माविमर्शः



इन्दलः
पूर्वशोधच्छात्रः
संस्कृतविभागः,
बी0आर0डी0बी0डी0पी0जी0कॉलेज, आश्रमबरहजदेवरिया,
उत्तरप्रदेशः,भारतः।

**Article Info**
Volume 4 Issue 2
Page Number: 86-90
**Publication Issue :**
March-April-2021
**Article History**
Accepted : 02 April 2021
Published : 07 April 2021

शोधसारांशः— निष्पक्षतया कथ्यते,तदा ध्वनिरेव काव्यस्यात्मा भवितुमर्हतीति निर्गलः पन्थाः। न केवलं कतिपयेषु काव्येष्वेव तस्य दर्शनमपितु सर्वेश्वपि तेषु तेषु लक्षणग्रन्थेष्वन्वेषणानन्तरं ध्वनिरेव दृष्टिपथमवतरिष्यतीति अत्र न कापि विप्रतिपत्ति। अतः काव्यस्यात्मनि प्रश्ने समुत्थिते, डिण्डिमघोषेण एतदेव कथयितुं शक्यते यद् ध्वनिरेव काव्यस्यात्मा नान्यत्किञ्चिदिति।

मुख्यशब्दः—काव्यम्, आत्मा, ध्वनिः, शास्त्रम्, लक्षणः।

यद्यपि न केवल संस्कृतसाहित्येऽपितु भारतीय दर्शनशास्त्रेऽपि तैस्तैर्मननशीलैर्मुनिभिर्यद्यपि बहुक्तं, तदापि न सुष्ठूक्तम्। हेतुनानेनैव साम्प्रतं विचारः क्रियते आत्मनो विषये।

कारणं च तत्र स्पष्टमेव प्रतिभाति। यदात्मा हि निर्गुणे,निराकरो,निरवयवः। अतोऽवयवरहिते वस्तुनि कथं नाम कस्यापि विदुषो वैदुष्यं स्फुटीभवेत्? एतदेव कारणं यदारभ्यास्माकं संस्कृ–तसाहित्यं भाषावद्धं जातमितिहासरूपेण चास्माकं समक्षमागतं,तदारम्यैवात्मानो विषये मतिमतां सतां विप्रतिपत्तयः संजाताः। यदास्माभिः स्वकीयं प्राचीनमर्वाचीनं च साहित्यं समवलोक्यते,तदा प्रतीयते यन्न केवलमाधुनिकेषु ग्रन्थेष्वपि तु प्राक्तनेषु ऋग्वेदादिग्रन्थेष्वप्येतद्विषये तैस्तैर्ऋषिभिः सिद्धान्तरूपेण संकेतरूपेण च किंचिदपि कथितमेव। परन्तु प्रकृतिप्रधानतया तदानीन्तनेषु तेषु ग्रन्थेषु न तथा तस्य वर्णनं विलोक्यते, यथा चोपनिषदादिषु। सर्वा उपनिषदः आत्मनो विषयं प्रतिपादयन्ति परं न पारंगच्छन्ति। यथोपनिषदादिषु न तस्य विषये किंचिदपि निर्णयो दीयते विद्वद्भिस्तथैवान्येष्वपि ग्रन्थेषु।कियत्कालान्तरं सूत्रसाहित्येऽपि तस्य चर्चा दृष्टिपथमायाति। किन्तु संक्षेपतया, स्फुटं चकास्ति तत्तत्वं यतसत्यमस्ति। अतएव विस्तरेणात्मनो विषयो टीकाकारैष्टीकागन्थेषु स्फुटीकृतः। तत्र सन्ति विदुषाभेतस्मिन् विषये बहवो विप्रतिपत्तयः।

**Copyright:** © the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

**वस्तुत किन्नाम खल्विद मात्मतत्त्वम्?**

केषांचिन्मते शरीरमेवात्मत्वेन स्वीक्रियते। केषांचिन्मते नास्त्यात्मत्वेन किंचिदपीत्ङ्गीक्रियते। केषांचिन्मते पुरुषरूपेण,अन्यैश्च ''ज्ञानाधिकरणमात्मा'' इत्यङगीक्रियते। अतोऽन्योषां मते उत्कृ–ष्ट सत्वप्रधान मायोपहितचैतन्यमनुत्कृष्ट सत्वप्रधानमायोपहितचैतन्यम् इत्युपाधिभिः पृथक्कृतोऽन्य एव कश्चिदात्मेति स्वीक्रियते। यथा च गीतायाम्–

**अच्छेद्योऽयमदाह्योऽयमक्लेद्योऽशोष्य एव च।**
**नित्यः सर्वगतः स्थाणुरचलोऽयं सनातनः।।**
**नैनं छिन्दन्ति शस्त्राणि नैनं दहति पावकः।**
**न चैनं क्लेदयन्त्यापो न शोषयति मारुतः।।**

अस्यतात्पर्य चेत्थम्– आत्मा हि एतादृक्किंचिदनिर्वचनीयं तत्त्वं,येन विना प्रयत्नशेतनापि न हि कश्चित् संसारेऽस्मिन् प्राणान् धारयितुं सक्षमः। एवंतदा प्रश्नः समुदेति यदित्थं यद्यात्मानं विना न हि वस्तुसत्ता,तर्हि यदि काव्यनामा कश्चित्पुरुषोऽङ्गीक्रियते चेत्तस्य को नाम खल्वात्मा भविष्यतीति। स्वस्वमतानुसारेणानेक शास्त्र पारंगतैः सततशास्त्र प्रक्षालन निर्मलबुद्धिभिः साहित्याटवी विहरणशीलैः पंचाननैः साहित्यकारैरालंकारिकैश्च तस्मिन् विषयेऽनेकानि मातानि समुत्थाप्यन्ते। तानि चैत्थम्–

यदि समेषां तेषां विदुषां मतान्यङ्गीकृत्यं विचार्यते तदा साकल्येन सर्वाणि मतानि षोढा विभक्तुं शक्यते– (1).तत्र केषांचन मते अलंकारा एव काव्यात्मत्वेन, स्वीक्रियन्ते। (2). परमन्ये विचारशीला विद्वांसो नहि गुणाः स्वातन्त्र्यण स्थातुमर्हन्तीति विचार्य गुणगुणिनो र्नित्यमसम्बन्घ इति मतमङ्गीकृत्य गुणा यमुत्कर्षयन्ति, स एव कश्चिदनिर्वचनीयः पदार्थः रसरूपः काव्यस्यात्मेति। (3).अपरे न केवलं रस एवापित्पङ्गाङ्गिभावत्वेन तस्योपकारकाणि अन्यान्यपि वस्तूनि काव्यस्यात्मा भवितुमर्हन्तीति विचार्य–काव्यस्यात्मा ध्वनिरिति बुधैर्यः समाम्नातपूर्वः इति कथयित्वा ध्वनिरेव काव्यस्यात्मेति। वस्त्वलंकार रसरूपं त्रिविधं ध्वनिमेव काव्यस्यात्मानं स्वीकुर्वन्ति। केचन एतादृशा अपि विद्वांसो दृष्टिपथम वतरन्ति, येषां मते (1).नालंकारो (2).न रसो (3). न च ध्वनिः काव्यस्यात्मात्वेन स्वीक्रियन्तेऽपि तु (4). रीतिरात्मा काव्यस्येति निश्चितम्। (5). परमन्ये तदसहमाना नायं पन्थाः विघते क्षोदक्षम इति व्याचक्षाणस्तत् खण्डयित्वा वक्रोक्तिमेव काव्यस्यात्मानं स्वीकुर्वन्ति। (6). केचिच्योचित्यमेव तदात्मानं स्वीकुर्वन्ति। इत्थं काव्यस्यात्मनो विषये षट् सम्प्रदायाः स्वस्वसिद्धान्तरूपेण कथमेते पदार्थाः काव्यस्यात्मा भवितुमर्हन्तीति प्रतिपाद्यन्ति।

तद्यथा–सर्वैर्निर्विरोध तथालंकारसम्प्रदायस्य प्रवर्तको भामह एव स्वीक्रियते। रुद्रटरुयक प्रभृतयोऽन्ये विद्वांसस्तमनुगच्छन्त स्तस्येव मतं स्वीकुर्वन्तो दृश्यन्ते। तेषां मतेऽलंकारा एव काव्ये काव्यत्मानेतु शक्ता भवन्ति। यदि काव्येऽलंकारा ने स्युस्तर्हि तस्य काव्यत्वं तथैव न भवितुमर्हति यथा तेजरहिता अग्निः। उक्तमपि जयदेवेन–अंगीकुर्वन्ति ये काव्यं ............।। इति अन्ये च गुणानेव काव्यस्यात्मात्वेन स्वीकुर्वन्ति। ते च गुणाः–

**श्लेषः प्रसादः समता माधुर्यं सुकुमारता।**
**अर्थव्यक्तिरुदारत्वमोजः कान्तिःसमाधयः।।**

शौर्यसौजन्यविनायादयो गुणाः शरीरावच्छिन्नः प्रधानात्मनि विद्यमानास्ते तमेवात्मानं प्रगुणयन्ति, न त्वचेतनं शरीरम् तथैव माधुर्यौजः प्रसादा गुणा रसस्थाः सन्तः काव्ये आत्मस्थानीयं श्रृंगारादिरसं प्रगुणी कुर्वन्ति। वामनस्तु रीतिमेव काव्यस्यात्मतत्वेन स्वीकरोति। पदानां संघटना रीतिः। सा च गुणव्यंजक वर्णादीनां योजनारुपैव बोध्या। रीयतेमाधुर्यादि गुणानां विशेषो जायतेऽनयेति रीतिरिति व्युत्यपत्या तथैव तथा वेधसः कलाकौशलकारिता द्वारा मुखनयनाद्यवयवानां यथोचितस्थाने यथायथं संनिविशेनांगनाय। अंगमंकनामिः शरीरच्छविं कामपि विलक्षणां सौन्दर्यचमत्कृतिमा द्ला कारिणीमातनोति। तथैव कवेर्लोकोत्तररचना नैपुष्येन वर्णपदादीनां यथायोग्ययोजनया काव्यच्छटा नितरां समुज्जृम्भमाणा घनघटेव हृदय हारिणी भवति। तथा च स्वाश्रयिण्यंगिनि रसादिवृत्तिः गुणाभिव्यंजकतया रसानामुत्कर्षा धायकत्येन गुणाव्यंजकपद विन्यासो रीतिरित्युच्यते। तदुक्तं वामनेन–विशिष्टा पदसंघटना रीतिः। विशेषो गुणात्मा इति वामनस्यायममिप्रायो यत्काव्ये गुणा एव विच्छिति विशेषमूलतया सारमिति। तासांच वैदर्भी प्रभृति रीतिनां माधुर्यादि गुणेष्वेव र्प्यवसानात् रीतिरेव काव्यस्यात्मा भवितुमर्हति। यतो हि गुणानां रसभावधर्मतया धर्मधर्मिणोश्च तदात्म्यसिद्धान्तेन तस्या अपि रीते रन्ततो रसेष्वेव पर्यवसानात्। तथाहि वैदर्भीप्रभृतिरीतयः पृथगाभासमाना अपि पर्यन्ते गुणमुखेन रस एवापतन्ति। तथा तदेकरूप। उपनागरिका प्रमुखाः शब्द वृत्तयः। तदतिरिक्तां कौशिक्यादयोऽर्थवृत्तयोऽप्यन्ते रसरूपेणैव परिणमन्ते। अर्थात् रीतिरसध्वन्योः परमार्थतस्त्वैक्यम्।।काव्यतत्वमविवेचकानामेव पुरविवेकिनां जीवब्रह्मणोखि पार्थक्यं न भासते। पर नायं पन्थाः क्षोदक्षमः।।

आनन्दवर्धनाचार्यस्तु 'काव्यस्यात्मा ध्वनि'प्रतिपदयति। तस्य कथनं जज्जगति सैव कविता काव्यत्वेन सहृदयद्वहय हारिणी भवति, यस्यां पिहितकामिनीकुचकलशवत् किंचिन्नगूठा केऽपि विलक्षंण एव रसादि व्यंगयपदार्थाः सद्वदयानां लोकोत्तर चमत्कारशालितया परमाह्लादजनकतया च प्रतीयन्ते। काव्यस्य निखिलं महत्त्वं तत्रैव निहितं भवति। व्यंजनाया महत्त्वं न केवलं साहित्यशास्त्रेऽपितु लोकव्यवहारेऽप्यनुभूयते दरीदृष्यते च। को नाम खलु ध्वनि पदार्थ? इति निरूपयन् कथयति काव्यशास्त्रिणाम् आनन्दवर्धन आनन्दवर्धनः–

**यत्रार्थः शब्दोवा तमर्थमुपसर्जनीकृतस्वार्थौ।**
**व्यंक्तः काव्यविशेषः स ध्वनिरिति सूरिभिः।।**

अर्थाद् यत्र वाच्यार्थः स्वस्वरूपं नायकशब्दो वा स्वाभिधेयार्थं गौणीकृत्य कमपि विलक्षणं व्यंग्यार्थ मुख्यतया प्रकाशयतः, स एवं काव्यविशेषो ध्वनिनिरुच्यते तत्स्वरूपं प्रतिपादयन्कथयति एव–

**प्रतियमानं पुनरन्यदेव वस्त्वस्ति वाणिषु महाकवीनाम्।**
**यत्तत्प्रसिद्धावयवातिरिक्तं विभाति लावण्य मिवांगनासु।।**

ध्वनेर्व्युत्पत्तिस्तु ध्वनयति यः स ध्वनिः इति कर्तृव्युत्पत्त्या शब्दोऽर्थश्च ध्वनिः। ध्वन्यते यः स ध्वनिरिति कर्मव्युत्पत्त्या व्यंगयोऽर्थो रसादिर्ध्वनिः। ध्वन्यते ध्वनति वा अनेन इति कदणव्युत्पत्त्या शब्दर्थयोः व्यंजनाव्यापारो ध्वनिः। ध्वनति, ध्वन्यते वा अस्मिन् इत्यधिकरणव्युत्पत्त्या ध्वनिः काव्यम्। अनया रीत्या ध्वनि शब्दस्य प्रयोगः व्यंजकरशब्दः2. व्यंगार्थः व्यंज्जकरसादिः3.व्यजनाव्यापारः4. व्यंगयप्रधान काव्यं चेति पंचधा। अतः ध्वनेरत्यन्त व्यापकतया सर्वे पदाः हस्तिपदे निमग्नाः इति न्यायेन ध्वनिरेव काव्यस्यात्मा

भवितुमर्हति। व्यंगयरसस्तु ध्वनेरेकदेशभूते ध्ननेरेवान्तः समापति। अतएव ध्वन्यालोक आनन्द वर्धनाचार्य काव्यस्या ध्वनिरिति बुधैरिति कथमयन् काव्यस्यात्मा ध्वनिरिति स्वीकरोति।

ध्वनि शब्देन वस्त्वलंकाररसरूपस्त्रि विधो ध्वनिरुच्यते। (1).वस्तु शब्देन तात्पर्यं यत्र शब्दार्थाभ्यां वस्तु कश्चिदर्थो व्यंजते,तत्र वस्तुध्वनिः। (2). यत्र चालंकारो व्यंजते,तत्रालंकार ध्वनिः। (30).रसरूपे ध्वनिस्तु न केवलं ध्वनिकारस्यमत एवापि तु रसवादिनां मतेऽप्यङ्गीक्रियते। साकल्येन च ध्वनेरेकपन्चाशद्भेदा,(4). भवन्तीति निर्विवादः पन्थाः। सर्वोऽपि ध्वनिः काव्यस्यात्मा भवति।

ध्वनेः प्रवक्ता मम्मटोऽपि ध्वनिरेव काव्यस्यात्मेति मन्यते। जगन्नाथोऽपि ध्वनिवादमेव पुष्णाति। वस्तुतस्तु सूक्ष्मेक्षिकया निरीक्षणेन ध्वन्यालोक कर्तुरेव पन्था उचित प्रतिभाति। यत्तु स्वपक्षग्रहणग्रहिलो विश्वनाथो'वाक्यं रसात्मकं काव्यमिति कथयन् रस एव काव्यात्मेति अंगीकरोति,तन्न सहृदयेभ्यो रोचते। तथा सति–

**श्वश्रूरत्र निमज्जति अत्राहं दिवसकं प्रलोकय।**
**मा पथिक! रात्र्यन्धः शय्यायामावयो निर्मङ्क्ष्यसि।।**

इत्यादौ वस्तुमात्रस्प व्यंगयत्वे नाकाव्यत्वापत्तिः स्यात्। यदि च तादृशव्यंगय वस्तुनः सत्वेऽपि रतेरुत्पत्ति रूपतया श्रृंगारराभासत्वेन न काव्यत्वहानिरित्युच्यते चेत्–'शिखरिणी कु नु नाम' इत्यादौ कः पन्था? अतएव ध्वनिकाव्य निर्माणेनैव कवेरात्मलाभः सम्भवति,नान्यथेति विभावनीयम् सुधीभिः।

वक्रोक्तिकाव्यजीवितमिति कथयता वक्रोक्ति जीवितकारेण कुन्तकेन वक्रोक्ति सम्प्रादयोऽङ्गीकृतः। तस्य कथनस्यायमभिप्रायो यद्वक्रोक्तिरेव सर्वेषामप्यलंकारणां मूलभूत वाक्य कक्षामतिकम्य व्यंगयसरणिमारूटा नितरां चमत्कारं प्रसविनी वर्तते। तां विना तेषामप्यलंकारणां कवि प्रतिभोत्या पतितत्व विरहाद् अलंकारत्व काव्यस्य च काव्यत्वं न भवितुमर्हति। न केवलं वक्रोक्तिकार एवापितु अन्येऽपि तस्य विषये एव प्रतिपादितवन्तः। यथा चोक्तं भामहेन–

**सैषा सर्वत्र वक्रोक्तिरनयार्थो विभाव्यते।**
**यत्नोऽस्यां कविना कार्यः कोऽलंकारोऽनया विना।।**

परन्तु यत्सत्यमलंकारत्वेन वक्रोक्तिरियं काव्यस्यात्मा तथैव भवितुं नार्हति,यथा कश्चिदलंकारः। यदि निष्पक्षतया कथ्यते,तदा ध्वनिरेव काव्यस्यात्मा भवितुमर्हतीति निर्गलः पन्थाः। न केवलं कतिपयेषु काव्येष्वेव तस्य दर्शनमपितु सर्वेश्वपि तेषु तेषु लक्षणग्रन्थेष्वन्वेषणानन्तरं ध्वनिरेव दृष्टिपथमवतरिष्यतीति अत्र न कापि विप्रतिपत्ति। अतः काव्यस्यात्मनि प्रश्ने समुत्थिते, डिण्डिमघोषेण एतदेव कथयितुं शक्यते यद् ध्वनिरेव काव्यस्यात्मा नान्यत्किञ्चिदिति।

सन्दर्भसूची

1.काव्यशास्त्र पृ0 210
2. गीतायाम्–2/23–24
3. काव्यशास्त्र पृ0 221
4. काव्यशास्त्र पृ0 240
5. ध्वन्यालोक 1/1
6. वक्रोक्तिजीवितम् 1/4

7. चन्द्रालोक 1/8
8. काव्यादर्श–1/41–42
9. काव्यालंकारसूत्र–1.2.6–8
10. काव्यशास्त्र पृ0 100
11. ध्वन्यालोक 1/13
12. ध्वन्यालोक 1/4
13. साहित्यदर्पण 1/3
14. ध्वन्यालोक,1/4उदाहरण
15. काव्यालंकार, 2/85